# mRityu njaya mAnasa pUjA stotram

# શ્રીમૃત્યુઞ્જયમાનસિકપૂજાસ્તોત્રમ્

## Document Information

Text title : mRityuJNjayamaanasikapuujaastotram

File name : mrtyumaanasa.itx

Category : pUjA, shiva, stotra, shankarAchArya

Location : doc_shiva

Author : Shankaracharya

Transliterated by : P. P. Narayanaswami swami at math.mun.ca

Proofread by : Narayanaswami and Sunder Hattangadi

Latest update : July 25, 2008

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 29, 2023

*sanskritdocuments.org*

# શ્રીમૃત્યુઞ્જયમાનસિકપૂજાસ્તોત્રમ્

કૈલાસે કમનીયરત્નખચિતે કલ્પદ્રુમૂલે સ્થિતં
  કર્પૂરસ્ફટિકેન્દુસુન્દરતનું કાત્યાયનીસેવિતમ્ ।
ગઙ્ગાતુઙ્ગતરઙ્ગરઞ્જિતજટાભારં કૃપાસાગરં
  કણ્ઠાલંકૃતશેષભૂષણમમું મૃત્યુઞ્જયં ભાવયે ॥ ૧॥

આગત્ય મૃત્યુઞ્જય ચન્દ્રમૌલે
  વ્યાઘ્રાજિનાલંકૃત શૂલપાણે ।
સ્વભક્તસંરક્ષણકામધેનો
  પ્રસીદ વિશ્વેશ્વર પાર્વતીશ ॥ ૨॥

ભાસ્વન્મૌક્તિકતોરણે મરકતસ્તમ્ભાયુધાલંકૃતે
  સૌધે ધૂપસુવાસિતે મણિમયે માણિક્યદીપાઞ્ચિતે ।
બ્રહ્મેન્દ્રામરયોગિપુઙ્ગવગણૈર્યુક્તે ચ કલ્પદ્રુમૈઃ
  શ્રીમૃત્યુઞ્જય સુસ્થિરો ભવ વિભો માણિક્યસિંહાસને ॥ ૩॥

મન્દારમલ્લીકરવીરમાધવી-
પુન્નાગનીલોત્પલચમ્પકાન્વિતૈઃ ।
કર્પૂરપાટીરસુવાસિતૈર્જલૈ-
રાધત્સ્વ મૃત્યુઞ્જય પાદ્યમુત્તમમ્ ॥ ૪॥

સુગન્ધપુષ્પપ્રકરૈઃ સુવાસિતૈ-
ર્વિયન્નદીશીતલવારિભિઃ શુભૈઃ ।
ત્રિલોકનાથાર્તિહરાર્ઘ્યમાદરા-
દ્ગૃહાણ મૃત્યુઞ્જય સર્વવન્દિત ॥ ૫॥

હિમામ્બુવાસિતૈસ્તોયૈઃ શીતલૈરતિપાવનૈઃ ।
મૃત્યુઞ્જય મહાદેવ શુદ્ધાચમનમાચર ॥ ૬॥

ગુડદધિસહિતં મધુપ્રકીર્ણં

સુઘૃતસમન્વિતધેનુદુગ્ધયુક્તમ્ ।
શુભકર મધુપર્કમાહર ત્વં
ત્રિનયન મૃત્યુહર ત્રિલોકવન્દ્ય ॥ ૭॥

પઞ્ચાસ્ર શાન્ત પઞ્ચાસ્ય પઞ્ચપાતકસંહર ।
પઞ્ચામૃતસ્નાનમિદં કુરુ મૃત્યુઞ્જય પ્રભો ॥ ૮॥

જગત્ત્રયીખ્યાત સમસ્તતીર્થ-
સમાહૃતૈઃ કલ્મષહારિભિશ્ચ ।
સ્નાનં સુતોયૈઃ સમુદાચર ત્વં
મૃત્યુઞ્જયાનન્તગુણાભિરામ ॥ ૯॥

આનીતેનાતિશુભ્રેણ કૌશેયેનામરદ્રુમાત્ ।
માર્જયામિ જટાભારં શિવ મૃત્યુઞ્જય પ્રભો ॥ ૧૦॥

નાનાહેમવિચિત્રાણિ ચીરચીનામ્બરાણિ ચ ।
વિવિધાનિ ચ દિવ્યાનિ મૃત્યુઞ્જય સુધારય ॥ ૧૧॥

વિશુદ્ધમુક્તાફલજાલરમ્યં
મનોહરં કાઞ્ચનહેમસૂત્રમ્ ।
યજ્ઞોપવીતં પરમં પવિત્ર-
માધત્સ્વ મૃત્યુઞ્જય ભક્તિગમ્ય ॥ ૧૨॥

શ્રીગન્ધં ઘનસારકુઙ્કુમયુતં કસ્તૂરિકાપૂરિતં
કાલેયેન હિમામ્બુના વિરચિતં મન્દારસંવાસિતમ્ ।
દિવ્યં દેવમનોહરં મણિમયે પાત્રે સમારોપિતં
સર્વાઙ્ગેષુ વિલેપયામિ સતતં મૃત્યુઞ્જય શ્રીવિભો ॥ ૧૩॥

અક્ષતૈર્ધવલૈર્દિવ્યૈઃ સમ્યક્તિલસમન્વિતૈઃ ।
મૃત્યુઞ્જય મહાદેવ પૂજયામિ વૃષધ્વજ ॥ ૧૪॥

ચમ્પકપઙ્કજકુરવકકુન્દૈઃ કરવીરમલ્લિકાકુસુમૈઃ ।
વિસ્તારય નિજમકુટં મૃત્યુઞ્જય પુણ્ડરીકનયનાપ્ત ॥ ૧૫॥

માણિક્યપાદુકાદ્વન્દ્વે મૌનિહૃત્પદ્મમન્દિરે ।
પાદૌ સત્પદ્મસદૃશૌ મૃત્યુઞ્જય નિવેશય ॥ ૧૬॥

માણિક્યકેયૂરકિરીટહારૈઃ
કાઞ્ચીમણિસ્થાપિતકુણ્ડલૈશ્ચ ।

મઞ્જીરમુખ્યાભરણૈર્મનોજ્ઞૈ-
રઙ્ગાનિ મૃત્યુઞ્જય ભૂષયામિ ॥ ૧૭॥

ગજવદનસ્કન્દધૃતે-
નાતિસ્વચ્છેન ચામરયુગેન ।
ગલદલકાનનપદ્મં
મૃત્યુઞ્જય ભાવયામિ હૃત્પદ્મે ॥ ૧૮॥

મુક્તાતપત્રં શશિકોટિશુભ્રં
શુભપ્રદં કાઞ્ચનદણ્ડયુક્તમ્ ।
માણિક્યસંસ્થાપિતહેમકુમ્ભં
સુરેશ મૃત્યુઞ્જય તેઽર્પયામિ ॥ ૧૯॥

મણિમુકુરે નિષ્પટલે ત્રિજગદ્ગાઢાન્ધકારસપ્તાશ્વે ।
કન્દર્પકોટિસદૃશં મૃત્યુઞ્જય પશ્ય વદનમાત્મીયમ્ ॥ ૨૦॥

કર્પૂરચૂર્ણં કપિલાજ્યપૂતં
દાસ્યામિ કાલેયસમાન્વિતૈશ્ચ ।
સમુદ્ભવં પાવનગન્ધધૂપિતં
મૃત્યુઞ્જયાઙ્ગં પરિકલ્પયામિ ॥ ૨૧॥

વર્તિત્રયોપેતમખણ્ડદીપ્ત્યા
તમોહરં બાહ્યમથાન્તરં ચ ।
સાજ્યં સમસ્તામરવર્ગહૃદ્યં
સુરેશ મૃત્યુઞ્જય વંશદીપમ્ ॥ ૨૨॥

રાજાન્નં મધુરાન્વિતં ચ મૃદુલં માણિક્યપાત્રે સ્થિતં
હિઙ્ગૂજીરકસન્મરીચિમિલિતૈઃ શાકૈરનેકૈઃ શુભૈઃ ।
શાકં સમ્યગપૂપસૂપસહિતં સદ્યોઘૃતેનાપ્લુતં
શ્રીમૃત્યુઞ્જય પાર્વતીપ્રિય વિભો સાપોશનં ભુજ્યતામ્ ॥ ૨૩॥

કૂષ્માણ્ડવાર્તાકપટોલિકાનાં
ફલાનિ રમ્યાણિ ચ કારવલ્લ્યા ।
સુપાકયુક્તાનિ સસૌરભાણિ
શ્રીકણ્ઠ મૃત્યુઞ્જય ભક્ષયેશ ॥ ૨૪॥

શીતલં મધુરં સ્વચ્છં પાવનં વાસિતં લઘુ ।

મધ્યે સ્વીકુરુ પાનીયં શિવ મૃત્યુઞ્જય પ્રભો ॥ ૨૫॥

શર્કરામિલિતં સ્નિગ્ધં દુગ્ધાન્નં ગોઘૃતાન્વિતમ્ ।
કદલીફલસંમિશ્રં ભુજ્યતાં મૃત્યુસંહર ॥ ૨૬॥

કેવલમતિમાધુર્યં દુગ્ધૈઃ સ્નિગ્ધૈશ્ચ શર્કરામિલિતૈઃ ।
એલામરીચમિલિતં મૃત્યુઞ્જય દેવ ભુઙ્ક્ષ્વ પરમાન્નમ્ ॥ ૨૭॥

રમ્ભાચૂતકપિત્થકણ્ઠકફલૈર્દ્રાક્ષારસાસ્વાદુમ-
ત્ખર્જૂરૈર્મધુરેક્ષુખણ્ડશકલૈઃ સન્નારિકેલામ્બુભિઃ ।
કર્પૂરેણ સુવાસિતૈર્ગુડજલૈર્માધુર્યયુક્તૈર્વિભો
શ્રીમૃત્યુઞ્જય પૂરય ત્રિભુવનાધારં વિશાલોદરમ્ ॥ ૨૮॥

મનોજ્ઞરમ્ભાવનખણ્ડખણ્ડિતા-
ન્રુચિપ્રદાન્સર્ષપજીરકાંશ્ચ ।
સસૌરભાન્સૈન્ધવસેવિતાંશ્ચ
ગૃહાણ મૃત્યુઞ્જય લોકવન્દ્ય ॥ ૨૯॥

હિઙ્ગૂજીરકસહિતં વિમલામલકં કપિત્થમતિમધુરમ્ ।
બિસખણ્ડાઁલ્લાવણ્યુતાન્મૃત્યુઞ્જય તેઽર્પયામિ જગદીશ ॥ ૩૦॥

એલાશુણ્ઠીસહીતં દધ્યન્નં ચારુહેમપાત્રસ્થમ્ ।
અમૃતપ્રતિનિધિમાઢ્યં મૃત્યુઞ્જય ભુજ્યતાં ત્રિલોકેશ ॥ ૩૧॥

જમ્બીરનીરાઞ્ચિતશ◌ૃઙ્ગબેરં
મનોહરાનમ્લશલાટુખણ્ડાન્ ।
મૃદૂપદંશાન્સહસોપભુઙ્ક્ષ્વ
મૃત્યુઞ્જય શ્રીકરુણાસમુદ્ર ॥ ૩૨॥

નાગરરામઠયુક્તં સુલલિતજમ્બીરનીરસમ્પૂર્ણમ્ ।
મથિતં સૈન્ધવસહિતં પિબ હર મૃત્યુઞ્જય ક્રતુધ્વંસિન્ ॥ ૩૩॥

મન્દારહેમામ્બુજગન્ધયુક્તૈ-
ર્મન્દાકિનીનિર્મલપુણ્યતોયૈઃ ।
ગૃહાણ મૃત્યુઞ્જય પૂર્ણકામ
શ્રીમત્પરાપોશનમભ્રકેશ ॥ ૩૪॥

ગગનધુનીવિમલજલૈર્મૃત્યુઞ્જય પદ્મરાગપાત્રગતૈઃ ।
મૃગમદચન્દનપૂર્ણં પ્રક્ષાલય ચારુ હસ્તપદયુગ્મમ્ ॥ ૩૫॥

પુંનાગમલ્લિકાકુન્દવાસિતૈર્જાહ્નવીજલૈઃ ।
મૃત્યુઞ્જય મહાદેવ પુનરાચમનં કુરુ ॥ ૩૬॥

મૌક્તિકચૂર્ણસમેતૈર્મૃગમદઘનસારવાસિતૈઃ પૂગૈઃ ।
પર્ણૈઃ સ્વર્ણસમાનૈર્મૃત્યુઞ્જય તેઽર્પયામિ તામ્બૂલમ્ ॥ ૩૭॥

નીરાજનં નિર્મલદીપ્તિમદ્ભિ-
ર્દીપાઙ્કુરૈરુજ્જ્વલમુચ્છ્રિતૈશ્ચ ।
ઘણ્ટાનિનાદેન સમર્પયામિ
મૃત્યુઞ્જયાય ત્રિપુરાન્તકાય ॥ ૩૮॥

વિરિઞ્ચિમુખ્યામરવૃન્દવન્દિતે
સરોજમત્સ્યાઙ્કિતચક્રચિહ્નિતે ।
દદામિ મૃત્યુઞ્જય પાદપઙ્કજે
ફણીન્દ્રભૂષે પુનરર્ઘ્યમીશ્વર ॥ ૩૯॥

પુંનાગનીલોત્પલકુન્દજાજી-
મન્દારમલ્લીકરવીરપઙ્કજૈઃ ।
પુષ્પાઞ્જલિં બિલ્વદલૈસ્તુલસ્યા
મૃત્યુઞ્જયાઙ્ઘ્રૌ વિનિવેશયામિ ॥ ૪૦॥

પદે પદે સર્વતમોનિકૃન્તનં
પદે પદે સર્વશુભપ્રદાયકમ્ ।
પ્રદક્ષિણં ભક્તિયુતેન ચેતસા
કરોમિ મૃત્યુઞ્જય રક્ષ રક્ષ મામ્ ॥ ૪૧॥

નમો ગૌરીશાય સ્ફટિકધવલાઙ્ગાય ચ નમો
 નમો લોકેશાય સ્તુતવિબુધલોકાય ચ નમઃ ।
નમઃ શ્રીકણ્ઠાય ક્ષપિતપુરદૈત્યાય ચ નમો
 નમઃ ફાલાક્ષાય સ્મરમદવિનાશાય ચ નમઃ ॥ ૪૨॥

સંસારે જનિતાપરોગસહિતે તાપત્રયાક્રન્દિતે
 નિત્યં પુત્રકલત્રવિત્તવિલસત્પાશૈર્નિબદ્ધં દૃઢમ્ ।
ગર્વાન્ધં બહુપાપવર્ગસહિતં કારુણ્યદૃષ્ટ્યા વિભો
 શ્રીમૃત્યુઞ્જય પાર્વતીપ્રિય સદા માં પાહિ સર્વેશ્વર ॥ ૪૩॥

સૌધે રત્નમયે નવોત્પલદલાકીર્ણે ચ તલ્પાન્તરે
  કૌશેયેન મનોહરેણ ધવલેનાચ્છાદિતે સર્વશઃ ।
કર્પૂરાઞ્ચિતદીપદીપ્તિમિલિતે રમ્યોપધાનદ્વયે
  પાર્વત્યાઃ કરપદ્મલાલિતપદં મૃત્યુઞ્જયં ભાવયે ॥ ૪૪॥

ચતુશ્ચત્વારિંશદ્વિલસદુપચારૈરભિમતૈ-
  ર્મનઃ પદ્મે ભક્ત્યા બહિરપિ ચ પૂજાં શુભકરીમ્ ।
કરોતિ પ્રત્યૂષે નિશિ દિવસમધ્યેઽપિ ચ પુમા-
  ન્પ્રયાતિ શ્રીમૃત્યુઞ્જયપદમનેકાદ્ભુતપદમ્ ॥ ૪૫॥

પ્રાતર્લિઙ્ગમુમાપતેરહરહઃ સંદર્શનાત્સ્વર્ગદં
  મધ્યાહ્ને હયમેધતુલ્યફલદં સાયંતને મોક્ષદમ્ ।
ભાનોરસ્તમયે પ્રદોષસમયે પઞ્ચાક્ષરારાધનં
  તત્કાલત્રયતુલ્યમિષ્ટફલદં સદ્યોઽનવદ્યં દૃઢમ્ ॥ ૪૬॥

॥ ઇતિ શ્રીમચ્છઙ્કરભગવતઃ કૃતૌ
મૃત્યુઞ્જયમાનસિકપૂજાસ્તોત્રં સમ્પૂર્ણમ્ ॥

Encoded and proofread by P. P. Narayanaswami swami@math.mun.ca
Proofread and corrected by Sunder Hattangadi

---

*mRityu njaya mAnasa pUjA stotram*

pdf was typeset on June 29, 2023

Please send corrections to *sanskrit@cheerful.com*